# Tiruchendur Shanmukha Stotram

# તિરુચેન્દૂર્ ષણ્મુખસ્તોત્રમ્

## Document Information

Text title : Shanmukha Stotram Tiruchendur

File name : ShaNmukhastotramtiruchendUr.itx

Category : subrahmanya, aShTaka

Location : doc_subrahmanya

Transliterated by : Sivakumar Thyagarajan shivakumar24 at gmail.com

Proofread by : Sivakumar Thyagarajan, PSA Easwaran

Latest update : March 8, 2020

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 2, 2024

*sanskritdocuments.org*

# તિરુચેન્દૂર્ ષણ્મુખસ્તોત્રમ્

ॐ શ્રીગણેશાય નમઃ ।

આદિશઙ્કર પ્રોક્તમ્ -

નારદાદિદેવયોગિવૃન્દહૃન્નિકેતનં
    બર્હિવર્યવાહમિન્દુશેખરેષ્ટનન્દનમ્ ।
ભક્તલોકરોગદુઃખપાપસઙ્ઘભઞ્જનં
    ભાવયામિ સિન્ધુતીરવાસિનં ષડાનનમ્ ॥ ૧॥

તારકારીમિન્દ્રમુખ્યદેવવૃન્દવન્દિતં
    ચન્દ્રચન્દનાદિ શીતળાઙ્ગમાત્મભાવિતમ્ ।
યક્ષસિદ્ધકિન્નરાદિમુખ્યદિવ્યપૂજિતં
    ભાવયામિ સિન્ધુતીરવાસિનં ષડાનનમ્ ॥ ૨॥

ચમ્પકાબ્જમાલતીસુમાદિમાલ્યભૂષિતં
    દિવ્યષટ્કિરીટહારકુણ્ડલાદ્યલઙ્કૃતમ્ ।
કુઙ્કુમાદિયુક્તદિવ્યગન્ધપઙ્કલેપિતં
    ભાવયામિ સિન્ધુતીરવાસિનં ષડાનનમ્ ॥ ૩॥

આશ્રિતાખિલેષ્ટલોકરક્ષણામરાઙ્ઘ્રિપં
    શક્તિપાણિમચ્યુતેન્દ્રપદ્મસમ્ભવાધિપમ્ ।
શિષ્ટલોક ચિન્તિતાર્થસિદ્ધિદાનલોલુપં
    ભાવયામિ સિન્ધુતીરવાસિનં ષડાનનમ્ ॥ ૪॥

વીરબાહુ પૂર્વકોટિવીરસઙ્ઘસૌખ્યદં
    શૂરપદ્મમુખ્યલક્ષકોટિશૂરમુક્તિદમ્ ।
ઇન્દ્રપૂર્વદેવસઙ્ઘસિદ્ધનિત્યસૌખ્યદં
    ભાવયામિ સિન્ધુતીરવાસિનં ષડાનનમ્ ॥ ૫॥

જમ્બવૈરિકામિનીમનોરથાભિપૂરકં
    કુમ્ભસમ્ભવાય સર્વધર્મ સારદાયકમ્ ।

તં ભવાબ્ધિપોતમમ્બિકેયમાશુ સિદ્ધિદં
    ભાવયામિ સિન્ધુતીરવાસિનં ષડાનનમ્ ॥ ૬॥

પૂર્ણચન્દ્રબિમ્બકોટિતુલ્યવક્ત્રપઙ્કજં
    વર્ણનીયસચ્ચરિત્રમિષ્ટસિદ્ધિદાયકમ્ ।
સ્વર્ણવર્ણગાત્રમુગ્રસિદ્ધલોકશિક્ષકં
    ભાવયામિ સિન્ધુતીરવાસિનં ષડાનનમ્ ॥ ૭॥

પૂર્વજન્મસઞ્ચિતાઘસઙ્ઘભઙ્ગતત્પરં
    સર્વધર્મદાનકર્મપૂર્વપુણ્યસિદ્ધિદમ્ ।
સર્વશત્રુસઙ્ઘભઙ્ગદક્ષમિન્દ્રજાપતિં
    ભાવયામિ સિન્ધુતીરવાસિનં ષડાનનમ્ ॥ ૮॥

ઇતિ તિરુચેન્દૂર્ ષણ્મુખસ્તોત્રં અથવા ષણ્મુખાષ્ટકં સમ્પૂર્ણમ્ ।

Encoded by Sivakumar Thyagarajan

Proofread by Sivakumar Thyagarajan, PSA Easwaran

---

*Tiruchendur Shanmukha Stotram*

pdf was typeset on February 2, 2024

Please send corrections to *sanskrit@cheerful.com*